# Shri Vidyaranya Ashtottarashatanama Stotram

# શ્રીવિદ્યારણ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Vidyaranya Ashtottarashatanamastotram

File name : vidyAraNyAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : NA

Proofread by : NA

Description/comments : See corresponding nAmAvalI

Latest update : April, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 16, 2021

*sanskritdocuments.org*

# શ્રીવિદ્યારણ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીવિદ્યારણ્યમુનિધ્યાનમ્ -
અવિદ્યારણ્યકાન્તારે ભ્રમતાં પ્રાણિનાં સદા ।
વિદ્યામાર્ગોપદેષ્ટારં વિદ્યારણ્યગુરું શ્રયે ॥

વિદ્યાવિદ્યાવિવેકેન પારં સંસારવારિધેઃ ।
પ્રાપયત્યનિશં ભક્તાંસ્તં વિદ્યારણ્યમાશ્રયે ॥

અથ શ્રીવિદ્યારણ્યાષ્ટોત્તરશતનામસ્તોત્રમ્ ।
વિદ્યારણ્યમહાયોગી મહાવિદ્યાપ્રકાશકઃ ।
શ્રીવિદ્યાનગરોદ્ધર્તા વિદ્યારત્નમહોદધિઃ ॥ ૧॥

રામાયણમહાસપ્તકોટિમન્ત્રપ્રકાશકઃ ।
શ્રીદેવીકરુણાપૂર્ણઃ પરિપૂર્ણમનોરથઃ ॥ ૨॥

વિરૂપાક્ષમહાક્ષેત્રસ્વર્ણવૃષ્ટિપ્રકલ્પકઃ ।
વેદત્રયોલ્લસદ્ભાષ્યકર્તા તત્ત્વાર્થકોવિદઃ ॥ ૩॥

ભગવત્પાદનિર્ણીતસિદ્ધાન્તસ્થાપનપ્રભુઃ ।
વર્ણાશ્રમવ્યવસ્થાતા નિગમાગમસારવિત્ ॥ ૪॥

શ્રીમત્કર્ણાટરાજ્યશ્રીસમ્પત્સિંહાસનપ્રદઃ ।
શ્રીમદ્બુક્કમહીપાલરાજ્યપટ્ટાભિષેકકૃત્ ॥ ૫॥

આચાર્યકૃતભાષ્યાદિગ્રન્થવૃત્તિપ્રકલ્પકઃ ।
સકલોપનિષદ્ભાષ્યદીપિકાદિપ્રકાશકૃત્ ॥ ૬॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞો મન્ત્રશાસ્ત્રાબ્ધિમન્થરઃ ।
વિદ્વન્મણિશિરઃ શ્લાઘ્યબહુગ્રન્થવિધાયકઃ ॥ ૭॥

સારસ્વતસમુદ્ધર્તા સારાસારવિચક્ષણઃ ।
શ્રૌતસ્માતસદાચારસંસ્થાપનધુરન્ધરઃ ॥ ૮॥

વેદશાસ્ત્રબહિર્ભૂતદુર્મતામ્બોધિશોષકઃ ।
દુર્વાદિગર્વદાવાગ્નિઃ પ્રતિપક્ષેભકેસરી ॥ ૯॥

યશોજૈવાતૃકજ્યોત્સ્નાપ્રકાશિતદિગન્તરઃ ।
અષ્ટાઙ્ગયોગનિષ્ણાતસ્સાઙ્ખ્યયોગવિશારદઃ ॥ ૧૦॥

રાજાધિરાજસન્દોહપૂજ્યમાનપદામ્બુજઃ ।
મહાવૈભવસમ્પન્ન ઔદાર્યશ્રીનિવાસભૂઃ ॥ ૧૧॥

તિર્યગાન્દોલિકામુખ્યસમસ્તબિરુદાર્જકઃ ।
મહાભોગી મહાયોગી વૈરાગ્યપ્રથમાશ્રયઃ ॥ ૧૨॥

શ્રીમાન્પરમહંસાદિસદ્ગુરુઃ કરુણાનિધિઃ ।
તપઃપ્રભાવનિર્ધૂતદુર્વારકલિવૈભવઃ ॥ ૧૩॥

નિરન્તરશિવધ્યાનશોષિતાખિલકલ્મષઃ ।
નિર્જિતારાતિષડ્વર્ગો દારિદ્ર્યોન્મૂલનક્ષમઃ ॥ ૧૪॥

જિતેન્દ્રિયઃ સત્યવાદી સત્યસન્ધો દૃઢવ્રતઃ ।
શાન્તાત્મા સુચરિત્રાઢ્યઃ સર્વભૂતહિતોત્સુકઃ ॥ ૧૫॥

કૃતકૃત્યો ધર્મશીલો દાન્તો લોભવિવર્જિતઃ ।
મહાબુદ્ધિર્મહાવીર્યો મહાતેજા મહામનાઃ ॥ ૧૬॥

તપોરાશિર્જ્ઞાનરાશિઃ કલ્યાણગુણવારિધિઃ ।
નીતિશાસ્ત્રસમુદ્ધર્તા પ્રાજ્ઞમૌલિશિરોમણિઃ ॥ ૧૭॥

શુદ્ધસત્ત્વમયોધીરો દેશકાલવિભાગવિત્ ।
અતીન્દ્રિયજ્ઞાનનિધિર્ભૂતભાવ્યર્થકોવિદઃ ॥ ૧૮॥

ગુણત્રયવિભાગજ્ઞઃ સંન્યાસાશ્રમદીક્ષિતઃ ।
જ્ઞાનાત્મકૈકદણ્ડાઢ્યઃ કૌસુમ્ભવસનોજ્જ્વલઃ ॥ ૧૯॥

રુદ્રાક્ષમાલિકાધારી ભસ્મોદ્ધૂલિતદેહવાન્ ।
અક્ષમાલાલસદ્ધસ્તસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ॥ ૨૦॥

ધરાસુરતપઃ સમ્પત્ફલં શુભમહોદયઃ ।
ચન્દ્રમૌલીશ્વરશ્રીમત્પાદપદ્માર્ચનોત્સુકઃ ॥ ૨૧॥

શ્રીમચ્છઙ્કરયોગીન્દ્રચરણાસક્તમાનસઃ ।
રત્નગર્ભગણેશાનપ્રપૂજનપરાયણઃ ॥ ૨૨॥

શારદામ્બાદિવ્યપીઠસપર્યાતત્પરાશયઃ ।
અવ્યાજકરુણામૂર્તિઃ પ્રજ્ઞાનિર્જિતગીષ્પતિઃ ॥ ૨૩॥

સુજ્ઞાનસત્કૃતજગલ્લોકાનન્દવિધાયકઃ ।
વાણીવિલાસભવનં બ્રહ્માનન્દૈકલોલુપઃ ॥ ૨૪॥

નિર્મમો નિરહઙ્કારો નિરાલસ્યો નિરાકુલઃ ।
નિશ્ચિન્તો નિત્યસન્તુષ્ટો નિયતાત્મા નિરામયઃ ॥ ૨૫॥

ગુરુભૂમણ્ડલાચાર્યો ગુરુપીઠપ્રતિષ્ઠિતઃ ।
સર્વતન્ત્રસ્વતન્ત્રશ્ચ યન્ત્રમન્ત્રવિચક્ષણઃ ॥ ૨૬॥

શિષ્ટેષ્ટફલદાતા ચ દુષ્ટનિગ્રહદીક્ષિતઃ ।
પ્રતિજ્ઞાતાર્થનિર્વોઢા નિગ્રહાનુગ્રહપ્રભુઃ ॥ ૨૭॥

જગત્પૂજ્યઃ સદાનન્દઃ સાક્ષાચ્છઙ્કરરૂપભૃત્ ।
મહાલક્ષ્મીમહામન્ત્રપુરશ્ચર્યાપરાયણઃ ॥ ૨૮॥

વિદ્યારણ્યમહાયોગિનામ્નામષ્ટોત્તરં શતમ્ ।
યઃ પઠેત્સતતં સમ્પત્સારસ્વતનિધિર્ભવેત્ ॥ ૨૯॥

ઇતિ શ્રીવિદ્યારણ્યાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*Shri Vidyaranya Ashtottarashatanama Stotram*
pdf was typeset on April 16, 2021

Please send corrections to *sanskrit@cheerful.com*